# SANSKRIT

## द्वितीय प्रश्न-पत्रम् : ( वैदिकसाहित्य, गद्य साहित्यम्, अनुवादः व्याकरणम् च )

Time Allowed : Three Hours    Max. Marks : 100

1. अधोलिखित मंत्रयोः हिन्दी भाषायां अनुवादः करणीयः-

   (क) अग्निना रयिमश्नवत् पोषमेव दिवेदिवे। 2×5
   यशसं वीरवत्तमम्।

अथवा

http://questionpaperresult.com/

Scanned by CamScanner

यस्या त्री पूर्णा मधुना पदान्य
अक्षीयमाणा स्वधया मदन्ति।
य उ त्रिधातु पृथिवीमुत् द्याम्
एको दाधार भुवनानि विश्वा।।

(ख) यस्मान्न ऋते विजयन्ते जनासो।
यं युध्यमाना अवसे हवन्ते।
यो विश्वस्य प्रतिमानं वभूव
यो अच्युतच्युत् स जनास इन्द्रः।।

**अथवा**

य आत्मदा बलदा यस्य विश्वे
उपासते प्रशिषं यस्य देवाः।
यस्यच्छायामृतं यस्य मृत्युः
कस्मै देवाय हविषा विधेम।।

2. अधोलिखितेषु प्रश्नेषु पञ्चप्रश्नानां संस्कृतमाध्यमेन उत्तराणि देयानि– 5×2

(क) अग्निसूक्ते प्रयुक्तछन्दसः किं नाम?
(ख) विष्णुसूक्तस्य ऋषिः कोऽस्ति?
(ग) 'प्रजापतिसूक्तम्' ऋग्वेदस्य कस्मात् मण्डलात् उद्धृतम्?
(घ) इन्द्रस्यानुशासने के वर्तन्ते?
(ङ) सृष्टेरुत्पत्तेः प्राक् कः समजायत?
(च) हिरण्यगर्भः कं कं धारयति?

3. अधोलिखित मन्त्रस्य हिन्दी भाषायां संसकृत भाषायां वा व्याख्या करणीया– 10

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते।।

**अथवा**

विद्यां चाविद्यां च यस्तद वेदोभयं सह।
अविद्यया मृत्युं तीर्त्वा विद्येयामृतमश्नुते।।

4. अधोलिखितयोः द्वयोः गद्यांशयोः हिन्दी भाषायाम् अनुवादः करणीयः– 10×2

(क) गर्भेश्वरत्वमभिनवयौवनत्वमप्रतिरूपत्वममानुषशक्तित्वं चेति महतीयं खल्वनर्थपरम्पराः सर्वाविनयानामेकैकमप्येषामायतनम् किमुत् समवायः। यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यामुपयाति बुद्धिः। अनुज्झितधवलतापि सरागैव, भवति यूनां दृष्टिः। अपहरति च वात्येव शुष्कपत्रं समुद्भूतरजोभ्रान्तिरतिदूरमात्मेच्छया यौवनसमये पुरुषं प्रकृतिः। इन्द्रियहरिणहारिणी च सतत मति दुरन्तेयमुपभोगमृगतृष्णिका।

**अथवा**

अलोकयतु तावत् कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम्। इयं हि सुभट खड्गमण्डलोत्पलवनविभ्रमभ्रमरीलक्ष्मीः क्षीरसागरात् पारिजातपल्लवेभ्यो रागम्, इन्दुशकलादेकान्तवक्रताम्, उच्चैः श्रवसश्चञ्चलताम्, कालकूटान्मोहनशक्तिम्, मदिरायाः मदम्, कौस्तुभमणेनैष्ठुर्यम्, इत्येतानि सहवासपरिचयवशाद्विरहविनोद चिह्नानि गृहीत्वैवोद्गता। नह्येवंविधपरिचितमिह जगति किंचिदस्ति यथेयमनार्या।

Scanned by CamScanner

(ख) यथा यथा चेयं चपला दीप्यते तथा तथा दीपशिखेव कज्जलमलिनमेव कर्म केवलमुद्वहति। तथाहि इयं संवर्धन वारिधारा तृष्णा विषवल्लीनाम्। व्याधगीतिरिन्द्रियमृगाणाम्। परामर्शधूमलेखा सच्चरितचित्राणाम्। विभ्रमशय्या मोहदीर्घनिद्राणाम्। तिमिरोद्गतिः शास्त्रदृष्टीनाम्। पुरः पताका सार्वविनयानाम् उत्पत्तिनिम्नगा क्रोधावेगग्राहाणाम्। आपानभूमिविषयमधूनाम्। संगीतशालाभ्रूविकारनाट्यानाम्। आवासदरीदोषाशीविषाणाम् उत्सारणवेत्रलता सत्पुरुषव्यवहाराणाम्। अकाल प्रावृड् गुणकलहंसानाम्।

**अथवा**

ग्रहैरिव ग्रह्यन्ते, भूतैरिवाभिभूयन्ते मन्त्रैरिवावेश्यन्ते, सत्वैरिवाष्टभ्यनते, वायुनेव विडम्ब्यन्ते, पिशाचैरिव ग्रस्यन्ते, मदनशरैर्मर्माहता इव मुखभंगसहस्राणि कुर्वन्ते, धनोष्मणा पच्यमाना इव वि चेष्टन्ते। गाढ प्रहारहता इव अंगानि न धारयन्ति कुलीरा इव तिर्यक् परिभ्रमन्ति, अधर्मभग्नगतयः पंगव इव परेण संचार्यन्ते। सपृच्छदतख इव कुसुमरजोविकारैरासन्नवर्तिकां शिरः शूलमुत्पादयन्ति।

5. केषाञ्चित् पञ्चप्रश्नानां उत्तरं संस्कृतभाषायाम् देयम्– 5×2

(क) शुकनासोपदेशः कस्य कृतिः अस्ति ?
(ख) तारापीडस्य मंत्रिणः नाम किमासीत् ?
(ग) चन्द्रापीडस्य पितुः नाम किमासीत् ?
(घ) लब्धापि दुःखेन का परिपाल्यते ?
(ङ) लक्ष्मी केनेव विडम्बयन्ते ?

6. अधोलिखित वाक्यानां हिन्दीभाषायामनुवादः करणीय– 10×1

(क) चक्रवत्परिवर्तन्ते दुःखानि च सुखानि च।
(ख) वरं विरोधोऽपि समं महात्मभिः।
(ग) रज्जुछेदे के घटं धारयन्ति।
(घ) हितं मनोहारि च दुर्लभं वचः।
(ङ) उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये।
(च) निरस्तपादपे देशे ऐरण्डोऽपि द्रुमायते।
(छ) अनभ्यासे विषं विद्या अजीर्णे भोजनं विषम्।
(ज) लिखितमिह ललाटे प्रोज्झितुं कः समर्थः।
(झ) मनस्वीम्रियते कामं कार्पण्यं न तु गच्छति।
(ण) विद्याहीना न शोभन्ते निर्गन्धा इव किंशुका।

7. अधोलिखितेषु सूत्रेषु त्रयाणां सूत्राणां व्याख्या सोदाहरणं कार्या– 3×3

(क) अतोभिस् ऐस् (ख) जसः शी
(ग) घेर्ङिति (घ) स्वमोर्नपुंसकात्
(ङ) वसो सम्प्रसारणम् (च) यूयवयौ जसि

8. अधोलिखितेषु पदेषु त्रयाणां पदानां सूत्रोल्लेखपूर्वकं सिद्धिं करणीया– 3×3

(क) रामयोः (ख) हरये
(ग) सर्वस्मिन् (घ) वारीणि
(ङ) ज्ञाने (च) रमायाम्

http://questionpaperesult.com/

Scanned by CamScanner

(छ) मम (ज) रामेण

9. अधोलिखितेषु केषाञ्चित् चतुर्णां सूत्राणाम् व्याख्या करणीया- 4×3

(क) अधिशीङ्स्थासां कर्म (ख) साधकतमं करणम्

(ग) रुच्यर्थानां प्रीयमाणः (घ) भीत्रार्थानां भयहेतुः

(ङ) यतश्चनिर्धारणम् (च) आधारोऽधिकरणम्

(छ) सहयुक्तेऽप्रधाने

http://questionpaperesult.com/

Scanned by CamScanner